# DELHI PUBLIC SCHOOL RUBY PARK KOLKATA

## REVISION SHEET 2017-18

## CLASS-X SUB- SANSKRIT (2n LANG)

**1. अधोलिखितं अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत लिखत—**

निदाघः, खलु कष्टकरः कालः वर्तते। अस्मिन् काले व्योमे उच्चैः स्थितः भानुः प्रचण्ड-तापेन तपति। वसन्तर्तौपश्चात् अस्य ग्रीष्मस्य आगमनं भवति। मानवाः, पशवः, पक्षिणः, सर्वे च जीव-जन्तवः व्याकुलाः भवन्ति। गृहात् बहिः गमनं कष्टकरं भवति धूलिपूरिताः वाताः वान्ति। जलस्य न्यूनता भवति, सरोवराः जलाशयाः, सरिताश्च शुष्यन्ते। पृथ्वी अपि तापेन तप्ता भवति। वृक्षाणाम् छाया अतीव सुखकरी प्रतीयते। प्रत्यक्षरूपेण कष्टकरः अयं कालः मानवानां हिताय अपि अस्ति। प्रस्वेदरूपेण तेषां शरीरेभ्यः सर्वान् दोषान् बहिः करोति। अयं निदाघः एव मेघानाम् उत्पत्तिकारकः। यैः मेघैः इयं पृथ्वी शस्यश्यामला क्रियते। एवं ग्रीष्मर्तुः अपि अस्माकम् उपकारम् एव करोति। 10

**I. एकपदेन उत्तरत—** ½ × 4 = 2

(*i*) ग्रीष्मकालः कीदृशः कालः ?

(*ii*) आकाशे कः प्रचण्डतापेन तपति ?

(*iii*) ग्रीष्मर्तौ कस्य न्यूनता भवति ?

(*iv*) निदाघः केषाम् उत्पत्तिकारकः ?

**II. पूर्णवाक्येन उत्तरत—** 2 × 2 = 4

(*i*) मेघाः किं कुर्वन्ति ?

(*ii*) ग्रीष्मस्य तापेन के व्याकुलाः भवन्ति ?

**III. भाषिककार्यम्—** 1 × 4 = 4

(*i*) 'ग्रीष्मकालः' अस्य पदस्य कृते किं अन्यत् पर्यायपदं गद्यांशे प्रयुक्तम् ? चित्वा लिखत।

(क) निदाघः (ख) प्रचण्डतापः (ग) कष्टकरः

(*ii*) 'धूलिपूरिताः वाताः' अनयोः पदयोः किम् पदम् विशेषणपदम् अस्ति ?

(*iii*) 'ग्रीष्मर्तुः अस्माकम् उपकारम् एव करोति' अत्र 'करोति' क्रियापदस्य किं कर्तृपदम् ?

(क) अस्माकम् (ख) उपकारम् (ग) ग्रीष्मर्तुः

(*iv*) 'प्रस्वेद रूपेण तेषां शरीरेभ्यः' अत्र 'तेषाम्' इति सर्वनाम पदं कस्मै प्रयुक्तम् ?

(क) मेघेभ्यः (ख) मानवेभ्यः (ग) वृक्षेभ्यः

### खण्डः 'ख' — 15 अङ्काः

### रचनात्मकं-लेखनम्

**पत्रलेखनम्**

**2. भवान् अंकुरः अस्ति। भवान् दिल्ली नगरे वसति। भवतः मित्रम् किसलयः आगरा नगरे वसति। ग्रीष्मावकाशे तम् स्वगृहम् आमन्त्रयितुम् लिखिते अस्मिन् पत्रे मञ्जूषायाम् प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा।** ½ × 10 = 5

50, नन्दनभवनम्

(*i*) ..............................

दिनाङ्कः 2.7.20XX

प्रियं (ii) ..............................

सप्रेम नमस्ते।

अत्र सर्वं कुशलं तत्रापि भवतां सर्वेषां कुशलं प्रार्थये। मया अद्य एव तव पत्रं (iii) .............................. । पत्रेण च ज्ञातम् यत् अधुना तव विद्यालये (iv) .............................. अस्ति। अतः अहं त्वाम् दिल्लीनगरम् (v) .............................. आमन्त्रये। श्वः एव स्व भ्रात्रा (vi) .............................. मम गृहम् आगच्छ। वयं दिल्ली नगरस्य दर्शनं करिष्यामः। मम गृहस्य समीपे एव एकः (vii) .............................. अस्ति। वयम् मिलित्वा तत्रं (viii) .............................. अभ्यासं करिष्यामः।

स्व पितरौ मम प्रणामाः

(ix) .............................. ।

तव आगमनस्य प्रतीक्षायाम्

तव अभिन्नमित्रम्

अंकुरः

| | |
|---|---|
| सेवायाम्<br>श्री किसलयः<br>24 विश्वनीडः<br>(x) ..............................<br>उत्तरप्रदेशः | |

मञ्जूषा- दिल्लीतः, आगन्तुम्, प्राप्तम्, आगरानगरम्, तरणतालः, ग्रीष्मावकाशः, निवेदनीयाः, सह, तरणस्य, किसलय।

## अनुच्छेदलेखनम्

3. 'परीक्षाकालः' इति विषयमधिकृत्य मञ्जूषा-पदसहाय्येन पञ्च संस्कृतवाक्यानि लिखत। 2 × 5 = 10

मञ्जूषा- परीक्षायाः, निद्रा, परिश्रम-साध्यम्, अहर्निशम्, दिनानि, जागरणम्, पुस्तकानि, न रोचते, शोभनाः अङ्काः, गणितस्य, न आयाति, पठनम्, रटनम्, स्मरणम्, संतुलितभोजनम्, अल्पम्।

**अथवा**

## चित्रवर्णनम्

अधःदत्तं चित्रं दृष्ट्वा संस्कृतेन पञ्चवाक्यानि लिखत— 2 × 5 = 10



मञ्जूषा- वर्षतौ, जलाप्लावस्य, वर्षायाः, जलम्, बालाः, प्रसन्नाः, खेलन्ति, कर्गद नौकां चालयन्ति, वृक्षाः, व्याधयः।

## खण्डः 'ग'  30 अङ्काः

## अनुप्रयुक्त-व्याकरणम्

**4. अधोलिखितरेखाङ्कित पदेषु सन्धि/सन्धिविच्छेदं वा कृत्वा पुनः पूर्ण वाक्यं लिखत।** 1 × 5 = 5

(i) यत्र यत्र <u>तरुच्छाया</u> तत्र तत्र पथिकाः।
  (क) तरु + छाया  (ख) तरुच् + छाया  (ग) तरु + शाया

(ii) <u>एतत् + शंकरेण</u> गीताभाष्ये कथितम्।
  (क) एतच्शंकरेण  (ख) एतच्छंकरेन्  (ग) एतच्छंकरेण

(iii) शकुन्तला <u>पत्युः + गृहम्</u> अगच्छत्।
  (क) पत्युगृहम्  (ख) पत्युर्गृहम्  (ग) पत्योर्गृहम्

(iv) राधा अकथयत् यत् सः <u>कवीन्द्रः</u> आसीत्।
  (क) कवि + ईन्द्रः  (ख) कवी + इन्द्रः  (ग) कवि + इन्द्रः

(v) अत्र मत्स्यजीवी आगच्छति, <u>मीनम् + च</u> विक्रीणाति।

**5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समास/विग्रहं वा कृत्वा उत्तरपुस्तिकायां लिखत—** 1 × 6 = 6

(i) अनुपमा हि <u>मानवशक्तिः</u>।
  (क) मानवस्य शक्तिः  (ख) मानवाय शक्तिः  (ग) मानवैः शक्तिः

(ii) <u>शुभदं</u> भूयात् नवं वर्षं सुमङ्गलम्।
  (क) शुभम् ददाति इति  (ख) शुभं ददति इति  (ग) शुभस्य ददाति इति

(iii) आचार्येण कीदृशम् <u>न अर्थः</u> कृतः ?
  (क) नार्थः  (ख) आनर्थः  (ग) अनर्थः

(iv) आपणं गत्वा <u>श्वेतम् अम्बरम्</u> आनय।
  (क) श्वेतअम्बरम्  (ख) श्वेतमम्बराम्  (ग) श्वेताम्बरम्

(v) <u>तरूमूले</u> सुवर्णकलशः विद्यते।

(vi) <u>सप्तानाम् अह्नानाम् समाहारे</u> कार्यं समाप्तं कुरू।

**6. अधोलिखितवाक्येषु कोष्ठके प्रदत्तान् प्रकृतिप्रत्ययान् योजयित्वा वाक्यानि पुनः लिखत—** 1 × 5 = 5

(i) अस्माभिः सत्कार्याणि एव (कृ + तव्यत्)
  (क) कर्तव्यम्  (ख) कर्तव्यानि  (ग) कर्तव्याः

(ii) मनुष्यः एकः (समाज + ठक्) प्राणी अस्ति।
  (क) सामाजिकी  (ख) सामाजिकः  (ग) सामाजिकं

(iii) (सुखार्थ + इन्) कुतः विद्या।
  (क) सुखार्थी  (ख) सुखार्थिनम्  (ग) सुखार्थिनः

(iv) (बुद्धि + मतुप्) छात्राः पुरुषार्थे विश्वसन्ति।
  (क) बुद्धिमन्तः  (ख) बुद्धिमान्  (ग) बुद्धिवन्तः

(v) बालकैः सुलेखः एवं <u>लिख् + अनीयर्</u>।

**7. तालिकादत्तपदानि संयोज्य पञ्च वाक्यानि रचयत।** 1 × 5 = 5

| | | | | |
|---|---|---|---|---|
| वयम् | इतस्ततः<br>कदापि<br>सहसा<br>उच्चैः<br>वृथा | समयं<br>कक्षायाम्<br>कार्यम्<br>आपणमार्गे<br>असत्यं | न | पापयेम<br>अवदाम<br>वदेम<br>कुर्याम<br>भ्रमामः |

**8. वाच्यानुसारं रिक्तस्थानानि पूरयित्वा लिखत।** 1 × 5 = 5

**गीता** — अद्य तव विद्यालये किम् अस्ति?

**सीता** — अद्य मम विद्यालये वार्षिकोत्सवः (*i*) ……………………।

(क) भूयते (ख) भवति (ग) भवामि

**गीता** — किं त्वं विद्यालयं (*ii*) …………………… ?

(क) गच्छसि (ख) गच्छ्यते (ग) गम्यते

**सीता** — आम् (*iii*) …………………… विद्यालयं गम्यते।

(क) त्वया (ख) मया (ग) अहम्

**गीता** — किम् शिक्षामन्त्री छात्रान् सम्बोधयति?

**सीता** — आम् शिक्षामन्त्रिणा (*iv*) …………………… सम्बोध्यन्ते।

(क) छात्रान् (ख) छात्रैः (ग) छात्राः

**गीता** — किं त्वम् पुरस्कारम् अपि गृह्णासि?

**सीता** — आम् मया पुरस्कारः अपि (*v*) ……………………।

(क) गृह्यते (ख) गृह्णाति (ग) गृह्णामि

**9. अधोलिखिते कार्यक्रमे अङ्कानां स्थाने संस्कृत शब्देषु समयं सूचयत। उत्तराणि उत्तरपुस्तिकायां लिखत।** 1 × 4 = 4

(*i*) 10.30 प्रातः प्रातः …………………… वादने मुख्यातिथेः आगमनम्।

(*ii*) 11.00 प्रातः प्रातः …………………… वादने पारितोषिक-वितरणम्।

(*iii*) 12.15 मध्याह्ने मध्याह्ने …………………… वादने मुख्यातिथेः भाषणम्, सांस्कृतिक-कार्यक्रमश्च।

(*iv*) 1.45 मध्याह्ने मध्याह्ने …………………… प्रीतिभोजनम्।

## खण्डः 'घ' 35 अङ्काः

## पठितांश-अवबोधनम्

**10. अधोलिखितं गद्यांशं, पद्यांशं नाट्यांशं च पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत—** 15

**(क) गद्यांशः**

राजा उवाच—भगवन्! भवन्मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि। आदिश्यताम्, किं करवाणि? विप्रः उवाच-यदि भवान् प्रीतः, तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्। तत् श्रुत्वा राजा अचिन्तयत्—"लोके चक्षुर्दानं दुष्करमेव। नूनम् ईदृशं दानम् इच्छन् अयं याचकः केनापि प्रेरितः स्यात्। अथवा भवतु नाम। किं बहु चिन्तनेन।" इति विचार्य राजा अभाषत-भो मित्र! किमेकेन चक्षुषा, अहं भवते चक्षुर्द्वयमेव प्रयच्छामि इति। 5

**I. एकपदेन उत्तरत—** ½ × 2 = 1

(*i*) अस्मिन् गद्यांशे राजा कस्य मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं मन्यते?

(क) भवतः (ख) विप्रस्य (ग) जनानाम्

(*ii*) 'अहं भवते चक्षुर्द्वयमेव प्रयच्छामि' इति 'भवते' पदं कस्मै प्रयुक्तम्?

(क) नृपाय (ख) विप्राय (ग) अमात्याय

**II. पूर्णवाक्येन उत्तरत—** 2 × 1 = 2

विप्रस्य मनोरथः किम् आसीत्?

**III. भाषिककार्यम्—** 1 × 2 = 2

(i) 'एकेन चक्षुषा' अनयोः पदयोः विशेष्यपदं किम् अस्ति?

(ii) 'लोकयात्रा' इति पदस्य अर्थः अस्ति 'संसार-यात्रा' 'जनयात्रा' 'लोकानां यात्रा'—एतेषु शुद्धम् उत्तरम् अस्ति।

**(ख) पद्यांशः**

**कः पथ्यतरः? धर्मः, कः शुचिरिह? यस्य मानसं शुद्धम्।**
**कः पण्डितः? विवेकी, किम् विषम्? अवधीरणा गुरुषु॥** 5

**I. एकपदेन उत्तरत—** ½ × 2 = 1

(i) केषाम् तिरस्करणम् संसारे विषम्?

(क) धर्मस्य (ख) पण्डितानाम् (ग) गुरूणाम्

(ii) अस्मिन् लोके कः कल्याणकारी?

(क) विवेकी (ख) धर्मः (ग) शुचिः

**II. पूर्णवाक्येन उत्तरत—** 2 × 1 = 2

इह कः शुचिः अस्ति?

**III. भाषिककार्यम्—** 1 × 2 = 2

(i) 'मनः' इत्यस्य समानार्थकं पदं श्लोकात् चित्वा लिखत।

(ii) 'अपवित्रः' अस्य विलोमपदं किमस्ति?

**(ग) नाट्यांशः**

**उषा** — भ्रातः! कोऽयं संन्यासी?

**अरुणः** — उषे! अयम् खलु प्रातः स्मरणीयः आदिगुरुः शङ्कराचार्यः अस्य एव कृतिः इयम्।

**उषा** — मानचित्रे कानि एतानि स्थानानि दर्शितानि?

**अरुणः** — एतानि तु मठस्थानानि, शङ्कराचार्येण स्थापितानि धर्मप्रचाराय। अयं महायोगी अष्टवर्षीयः एव संन्यासं स्वीकृत्य भारते वेदान्तस्य प्रचारम् अकरोत्।

**उषा** — किं आचार्येण ग्रन्थाः अपि रचिताः?

**अरुणः** — आम्! तेन विविधाः ग्रन्था रचिताः। तेषु एव विद्यते इयं रचना प्रश्नोत्तररत्नमालिका यत्र प्रश्नोत्तरमाध्यमेन इदं ज्ञापितं यदस्माभिः जीवने किं किं ग्राह्यम् किं किं च त्याज्यम्। 5

**I. एकपदेन उत्तरत—** ½ × 2 = 1

(i) शङ्कराचार्यः कस्य प्रचारम् अकरोत्?

(क) संन्यासस्य (ख) वेदान्तस्य (ग) मठस्य

(ii) शङ्कराचार्यः केन उपाधिना प्रसिद्ध आसीत्?

(क) आदिकविः (ख) आदिगुरुः (ग) आदिमानवः

**II. पूर्णवाक्येन उत्तरत—** 2 × 1 = 2

प्रश्नोत्तररत्नमालिकायां शङ्कराचार्येण किं प्रतिपादितम्?

**III. भाषिककार्यम्—** 1 × 2 = 2

(i) 'ग्राह्यम्' इत्यस्य पदस्य विलोम पदं संवादात् चित्वा लिखत।

(ii) 'प्रातःस्मरणीयः' कस्य विशेषणम्?

(क) मठस्य (ख) प्रश्नोत्तररत्नमालिकायाः (ग) शङ्कराचार्यस्य

**11. अधोलिखित पद्यद्वयस्य भावार्थम् उपयुक्त पदैः पूरयित्वा लिखत।** 4

(*i*) **शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।**

**कामक्रोधोद्भवं वेगं, सः युक्तः स सुखी नरः॥** ½ × 4 = 2

**भावार्थः**—यः नरः (*i*) .................... त्यागात् पूर्वम् एव कामात् क्रोधात् च उद्भवं (*ii*) ....................

सोढुं समर्थः भवति। सः (*iii*) .................... एव योगी (*iv*) .................... च मन्यते।

(*ii*) **नलिनी दलगतजलवत्तरलं किम्? यौवनं धनं चायुः।**

**कथय पुनः के शशिनः किरणसमाः? सज्जना एव॥** ½ × 4 = 2

**भावार्थः**—यथा कमलस्य पत्रस्य उपरि स्थितं (*i*) .................... चञ्चलं भवति एवमेव यौवनम् धनम् (*ii*) .................... अपि अस्थिरम् भवति। न जाने कदा किं भविष्यति? द्वितीयपंक्तौ तु सज्जनान् प्रशंसयन् कथितम् अस्ति यत् ते (*iii*) .................... किरणाः इव (*iv*) .................... भवन्ति।

**12. अधोलिखितपद्यस्य अन्वये रिक्तस्थानानि पूरयित्वा पुनः लिखत—** 4

**किं मरणम्! मूर्खत्वम्, किं चानर्घम्? यदवसरे दत्तम्।**

**आमरणात्किं शल्यम्? प्रच्छन्नं यत्कृतं पापम्॥** 1 × 4 = 4

**अन्वयः**—मरणम् किम्? (*i*) ....................। अनर्घं च किम्? यत् (*ii*) .................... दत्तम्।

आमरणात् (*iii*) .................... किम्? यत् पापं (*iv*) .................... कृतम्।

**13. वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।** 1 × 4 = 4

(*i*) <u>मनसः</u> निग्रहः वायोः इव दुष्करः।

(*ii*) यत् अवसरे दत्तम् तत् <u>अनर्घम्</u>।

(*iii*) <u>दानशालासु</u> विचरन् राजा अचिन्तयत्।

(*iv*) दुर्निग्रहं चलं च मनः <u>अभ्यासेन</u> गृह्यते।

**14. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनः क्रमेण लिखत—** ½ × 8 = 4

(*i*) याचकः एकस्य चक्षुषः दानम् इच्छति स्म।

(*ii*) सः नगरस्य समन्ततः दानशालाः अकारयत्।

(*iii*) प्रसन्नः शक्रः राज्ञे वरं दत्त्वा अदृश्यः अभवत्।

(*iv*) अहम् अस्य चक्षुः पुनः स्थापयितुं प्रयतिष्ये इति शक्रः अचिन्तयत्।

(*v*) तस्य दानशीलतां परीक्षितुम् देवराज इन्द्रः नेत्रहीन याचकस्य रूप नृपस्य समीपे आगच्छत्।

(*vi*) राज्ञः चक्षुर्दानस्य निश्चयं ज्ञात्वा अमात्याः विषण्णाः भूत्वा राजानम् एवं कर्तुम् न्यवारयत्।

(*vii*) भगवान् बोधिसत्त्वः बाल्यादेव विनम्रः वृद्धोपसेवी प्रजायाः सुपालकः आसीत्।

(*viii*) राजा याचकानाम् विरलसंख्यां दृष्ट्वा अङ्गदानार्थम् अचिन्तयत्।

15. रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धमर्थं चित्वा लिखत। 1 × 4 = 4

(i) आचार्यात् पादम् आदत्ते।

(क) पादपम् (ख) चरणम् (ग) चतुर्थांशम्

(ii) माधुर्यम् अक्षर व्यक्तिः पदच्छेदस्तु सुस्वरः।

(क) शर्करायुक्तम् (ख) मधुरतायाः अभावः (ग) कोमलतया वर्णोच्चारणम्

(iii) अवधीरिताः अस्माभिः गुरुजनोपदेशाः।

(क) पालिताः (ख) विचारिताः (ग) तिरस्कृताः

(iv) किं च अनर्घम्? यदवसरे दत्तम्।

(क) पापरहितम् (ख) बहुमूल्यम् (ग) अर्थरहितम्

□□